Research Paper Commerce

कौटिल्यस्य अर्थशास्त्रे राज्यभारपद्धतिः

Dr. C. Palaiah

Assistant Professor Department of Sanskrit Pondicherry University Pondicherry-605014

ABSTRACT

कौटिल्यस्य अर्थशास्त्रं समग्रं राज्यभारक्रमं विशदयति । अर्थशास्त्रपरिणतेषु कौटिल्यः अत्यन्तं श्रेष्टः । अस्य विष्णुगुप्तः, चाणक्य इति च नामान्तरम् अस्ति । एतस्य मेरुकृतिरेव अर्थशास्त्रम् । इमं ग्रन्थं इदं प्रथमंतया मैसुरु प्रच्यविद्यासंधोनालयस्य डा. आर्. रामशास्त्रिणः संशोध्य प्रकटितवन्तः ।राष्ट्रनिर्माणं तथा राष्ट्ररक्षणमधिकृत्य विशिष्टज्ञानमेव अर्थशास्त्रम् इति कौटिल्यस्य मतम् । अर्थवैशाल्येन शास्त्रमिदं राज्यभारक्रममपि विवृणोति इति ज्ञायते । राजा, मन्त्री, मित्रं, कोशः, देशः, दुर्गः, सैन्यम् इति सप्त राज्याङ्गानि, आन्वीक्षिकी, त्रयी,वार्ता, दण्डनीतिः इति चतस्त्र- विद्याः, सामदानभेददण्डा इति चत्वारः उपायाः विदेशाङ्गनीतिः, मण्डलव्यवस्था, राजदण्डनाधिकातरः – इति एषु विषयेषु विदुषां चर्चाः प्रचलन्ति ।

KEYWORDS कौटिल्यः, अर्थशास्त्रः,राजा,मन्त्री,

कौटिल्यस्य अर्थशास्त्रे शिक्षणम्, मन्त्रिणां नियोजनम्,मन्त्रिपरिषदः रचनम्, राज्ञा स्वपुत्रपरीक्षणम्, मृते राजनि मन्त्रिणः कार्यभारं, राज्ञः दण्डप्रयोगाधिकारः, सामाजिकं तथा अपराधिविषयकः नियमः, देशस्वरूपम् लक्षणंञ्च, राज्यरक्षणं , शत्रोः आक्रमण निरोधप्रकारः, आत्मरक्षणायै युद्धम्, बहुविधनियमावलिः, राज्यभारक्रम इति अनेके विषयाः निरूपिताः ।

कौटिल्यस्य अर्थशास्त्रे तन्त्रविभागः आवापविभागः इति विभागद्वयं वर्तते । तन्त्रविभागे पञ्च आधिकरणानि, चतुर्नवति प्रकरणानि च, आवापविभागे नव अधिकरणानि, चतुरशीति प्रकरणानि च सन्ति । पञ्चदशे अधिकरणे एकमेव विभिन्नं प्रकरणमस्ति । प्रजानां योगक्षेमपरिकल्पनं तन्त्र इति , अन्यविषये तदाधिकारिणः विषये च क्रियमाणः जागरुकः तत् सिद्धतां च आवाप इति कौटिल्यः प्रतिपादयति । कौटिल्यस्य काले वंशपारंपर्यं राज्यभारमासीत् । राजा, तत्पुत्राः, तत्पौत्राः राज्यं शासन्ति स्म । अतः राज्ञां विषयं कौटिल्यः प्रथमं विवृणोति –

चातुर्वर्ण्यं चातुराश्रम्यं अनुसृत्य जनाः स्वकर्तव्यं कुर्युः इति कौटिल्यतत्त्वस्य मुलम् । अतः राजा विद्यावान् व्यवहारनिपुणः नियमपालकश्च भवेत् । निष्ठुरवचाः राजा प्रजापीडको भवति तथा मृदुः गौरवं न प्राप्नोति, यथोक्तम् तीक्ष्णदण्डो हि भूतानां उद्वेजनीयः । मृदुदण्डः परिभूयते । 'यथाहिदण्डः पूज्यः' । अतः न्यायोचितं दण्डं कुर्यात् । कारणं विना न दण्डयेत् । तथा च अदण्ड्यः मा भुत् । मात्स्यन्यायप्रकारेण राजा यदि न दण्डयति तदा राज्ये अराजकता भविष्यति । "अप्रणीतो हि मात्स्यन्यायमुद्भावयति । बलीयान् अबलं हि ग्रसते दण्डधराभावे । तेन गुप्तः प्रभवति" । बृहन्मत्स्याः दुर्बलमत्स्यान् इव बलवन्तः दुर्बलान् पीडयान्ति यदि राजा न स्यात् । अतः राजा दण्डधरः भवेत् । इति कौटिल्यमतम् । विद्यासंपन्नः राजा उत्तमशासको भवति ।

राज्ञः परिपालनकर्मणि मन्त्रिणः प्राधान्यं अतीव वर्तते । मन्त्रिणः आवश्यकता, तस्य अर्हता , तस्य नियुक्तिः, तस्य प्रामाणिकता – एतान् विषयान् परीक्षितुं उपधानामकम् विधिं कौटिल्यः निरुपितवान् । सचिवेषु बुद्धिसचिवः कर्मसचिवश्चेति द्विविधौ । बुद्धिसचिवः मन्त्री भवति । राज्यभारं अधिकृत्य राज्ञा सह एते मन्त्रिणः मन्त्रालोचनं कुर्वन्ति । मन्त्रालोचनसमित्यां चतुरधिकाः मन्त्रिणः न भवेयुः । मन्त्रिपरिषदि येकेऽपि मन्त्रिणः भवितुमर्हन्ति । अतिमुख्यविषयेषु बुद्धिकर्मसचिवान् निमन्त्र्य कार्यं कुर्यात् । बहुमतं अङ्गीकुर्याच्च । यदि बहुमतं अनुचितं तर्हि उचितम् अल्पसंख्यामतं परिगणयेत् राज्यस्य आन्तरिकबाह्यविषयान् सम्यक् विदित्वा राजा प्रजासंतोषकरः भवेत् । एतस्मिन् विषये गुप्तचराः अत्यन्यं सहायकाः । कौटिल्याभिप्रायेण गूढचरेषु राज्यव्यवस्था तिष्ठति । गुप्तचरेषु संस्था, सञ्चारी इति द्वैविध्यम् । संस्थास्थः एकत्र उशित्वा विचारान् संगृह्णाति । संचारीस्थः सर्वत्र गत्वा रहस्यं वेत्ति । गुप्तचराः रहस्यं वेत्तुं आप्तसहायकान् उपाशिष्यान् नियोज्य एकं व्युहं विरचयेत् । एते मन्त्रिणः, उन्नताधिकारिणः सम्यक् परीक्षयेयुः । तत्र उभयवेतनगुढचराः आसन् । शत्रुराजसर्वविषयं संगृह्य रहस्यं प्रेषयन्तः एते गृढचराः उभयत्र वेतनं स्वीकुर्वन्ति स्म ।

स्वपुत्रविषये अपि राजा जागरुकः भवेदिति कौटिल्यमतम् – "जन्मप्रभृति राजपोत्रान् रक्षेत् । कर्कटकसधर्माणो हि जनकभक्षाः राजपुत्राः" । कर्कटा इव स्वपितरौ एव राजपुत्राः भक्षयेयुः । राजकुमारः यदि विद्याविहीनी भवति तदा समग्रं कुलं नश्यति । अतः नीचान् अशिक्षितान् राजकुमारान् हित्वा सद्गुणिनं राजकुमारं उत्तरधिकारिस्थाने नियोजयेत् । एकं अपि पुत्रं नीचं राजपदव्यां न नियोजयेत् । तेन प्रजाः कष्टभाजो भवन्ति ।

अर्थशास्त्रे द्वितीये प्रकरणे राज्यभारविषयान् वक्ति । राजा व्यवहारे निपुणः भवेत् न कदचिदपि व्यवहारे मन्दगतिः स्यात् । व्यवहारे मन्दगतिः बहुविधसमस्यां जनयति । कौटिल्यः एवं वदति – "राजानुत्तिष्ठमानमनुत्तिष्ठन्ते भृत्याः । प्रमाद्यन्तमनुप्रमाद्यन्ति । कर्माणि चास्य भक्षयन्ति । द्विषद्विश्च अतिसन्धीयते" । कार्यमग्नं राजानं भृत्याः भयात् अनुसरन्ति । किन्तु यदि राजा अलसः तदा सेवकाः औदासीन्यं प्रकटयन्ति । तदा शत्रवोऽपि आक्रमणं कुर्वन्ति । अतः राजा सदा कार्यतत्परः स्यात् ।

प्राचीनभारतस्य केन्द्रीकृतराज्यवस्थां कौटिल्यः सम्यक् निरुपयति । कृषिकेभ्यः भुमिप्रदानसूमये कुत्रचित् द्विजेभ्योऽपि कररहितं भुवं प्रदद्यात् । अयोग्यमपि भुमिम् कृषिकेभ्यः योग्यतासिद्ध्यर्थं दद्यात् पुनः न स्वीकुर्याच्च । कृषिकाणां करविषयं राजा एव प्रभुः । स्ववित्तकोशंनिचिन्त्य कराधिक्यं करन्युनं च योजयेत् ।

दुर्गनिर्माणकाले सम्यक् विचिन्त्य दुर्गं रचयेत् । तत्र अनेकवर्षपर्यन्तं धान्यादीनां संग्रहणार्थं व्यवास्थितरीत्या आगारं विन्यसेत् । तत्र तैलम्, धान्यानि , शर्करा, लवणम् औषधम् , शुष्कशाकानि, काष्ठम्, शुष्कमत्स्यम्, आयुधम् , विषम् , वेणुः , चर्म, अङ्गरञ्च संग्रहेत् ।

भाण्डागारस्य मुख्यं "सन्निधाता" इति वदन्ति । एषः कोशस्य, संग्रहालयस्य, आयुधशालायाः कारागृहस्य च अधिकारि भवति । यः करं संगृह्णाति सः समाहर्ता भवति । सः दुर्गराष्ट्रखनिसेतुवनव्रजवणिक् पथादिभ्यो करं संगृह्य राजानं ददाति । अर्थव्यवस्थांच एष एव परिवीक्षते ।

राजा सर्वविभागमुख्यान् आलोच्य नियोजयेत् । यथा- शाक्तितः कर्मसु नियोज्याः । कर्मसु चैषां परीक्षां कारयेत् चित्तानित्यत्वान्मनुष्याणाम् । ते यथा संदेशं असंहता अविगृहीता कर्मणि कुर्युः । संहता भक्षयेयुः , विगृहीता विनाशयेयुः । न चानिवेद्य भर्तुः किञ्चित् आरम्भं कुर्युः अन्यत्रापत्प्रतीकारेभ्यः सर्वविभागमुख्याः संख्यायकलेखकरूपदर्शकान् नियोजयेत् । तेषां परीक्षणं च सदा कार्यम् । यथा असंहता अविगृहीताश्च कर्माणि कुर्युः तथा कार्यम् । ते न कदाचित् आज्ञां विना अधिकारं प्रतिष्ठापयेयुः । भष्टाचारं विरेधयेत् । लवणव्यापारम् राष्ट्रियोद्यमः । लवणमिश्रणमपराधः । विदेशात् अनुपयुक्तं प्रजाऽहितकरं वस्तु न स्वीकुर्यात् । प्रजाहितकरं देशे अविद्यमानं वस्तु कररहितं यथा स्यात् तथा च कुर्यात् । क्षेत्रसमीपे यन्त्रागारसमीपे च वस्तुविक्रयणं न भवेत् ।

नगरस्य कार्यभारं नागारिकः करोति । नागरिकः तस्य भृत्याश्च पुसभाविवरणपुस्तकं लिखेयुः । सत्रेषु ये वसन्ति, ये च आगच्छन्ति निर्गच्छन्ति च तेषां विवरणं लिखेत् । उपहारभोजनवसतिवेश्यागृहेषु अधिकृतान् एव वस्तुं यच्छेत् । वैद्या रोगिनः, गृहस्था अतिथिनः भूप्रभवः स्वाधिकरिणः विवरणं दद्युः । पत्तननिवासिनः अग्निशामकयन्त्राणि, जलपुरणीर्थं बृहत् भाण्डानि च संगृह्य स्थापयेयुः । मृतदेहानां संस्कारविषये कश्चन नियमः भवेत् । रात्रौ विद्यमानविचारान् नागरिकः राज्ञे निवेदयेत् । युवराजपट्टाभिषेकसमये, विजयोत्सवे, राजकुमारजननकाले च कारागृहात् विसृजेत् जनान् । राज्ञः जन्मदिने पूर्णमायां च रोगिणः असहायकांश्य विसृजेत् ।

पौरविचारानपि कौटिल्यः विवृणोति । धर्मश्च व्यवहारश्य चरित्रं राजशासनम् इत्यनेन न्यायागविचारेषु राजा एव निर्णयाधिकारि इति उक्तवान् । न्यायनिर्णयेषु धर्मस्थाः राज्ञे साहाय्यं कुर्वन्ति । ते तावत् व्यवहारनिपुणेषु पूर्वमेव समालोचनं कुर्वन्ति । विवाहसंबंधिनः विचारान् निर्णीय वदन्ति । युक्तायुक्तवैवाहिकसंबन्धाः, विधवापुनर्विवाहः, पत्नीहीनपुनर्विवाहः, वरदाक्षिणा, दांपत्यविच्छेदः, ऋणम् , निधिः , भृत्याः, क्रयविक्रयविचारः, बहुमाननिराकरणम् , द्रव्यप्रभ्वोः संबन्धएते विषया न्यायांगाधीनाः ।

कौटिल्याभिप्रायेण द्वादशवर्षा स्त्री प्राप्तव्यवहारा भवति । षोडशवर्षः पुमान् । कौटिल्यमतानुसारेण ब्राह्मप्राजात्यार्षदैवाः विवाहाः धर्मसम्मता भवन्ति ।

वञ्चकव्यापारिभ्यः राजा जनान् रक्षेत् । कृत्रिमनिष्कनिर्मातृन् शिक्षयेत् । प्राकृतिकविकोपसमये राजा परिहारं दद्यात् । सर्वकारभृत्याः जनान् यथा न पीडयेयुः तथा कुर्वन्ति । स्त्रीणामत्याचारम् , नियमोल्लंघनजनान् शिक्षयेत् । विचारणाधिकारिणः प्रदेष्टा इति अपरम् नाम । तस्य आनुकूल्यसिद्ध्यर्थं एका मण्डलिः वर्तते । कार्मिकसंघः, सहकारिसंस्था च राजाधीना भवेत् । एते संघादयः आदायं निर्णयानुसारेण स्वीकुर्युः । मिथ्यापवाहः, द्यूतम्, बलप्रयोगः, अपहरणम् , एतेषु विषयेषु राजा यथार्हं शिक्षयेत् । राजापि नियमोल्लंघनं करोति चेत् सः दण्ड्य एव भवति ।

राजद्रोमान्त्रिणः विषयान् विचिन्त्य दण्डनं कुर्यात् । अर्थव्यवस्थायै वित्तकोशं पूरयोत् । अर्थहीनास्थितौ अर्थसंग्रहार्थं राजा प्रतयतेत् । तस्मिन् काले मुग्धान् न शोषयेत् ।

कौटिल्याभिप्रायेण राजा शान्तिं इच्छेत् न युद्धम् । यतः युद्धात् मानवजीवहानिः , धनव्ययश्च भवति । राजा तु प्रजानां अभिवृद्ध्यर्थं आर्थिकास्थितिमपि न गणयेत् । राज्यभारसमये संघलाभं राजा स्वीकुर्यात् । यतः संघलाभो दण्डमित्रलाभानामुत्तमः । संघा हि संहतत्वात् अधृष्याः परेषाम् । शत्रूणामप्रधृष्यः अयं संघबलः । अर्थात् राजा अनेकेषां मित्रराजानां संघं विरचय्य राज्यं सुस्थितौ विन्यसेत् इति कौटिल्यमतम् ।

प्रजापरिपालनसमये राजा कथं शत्रुनिवर्हणं कुर्यात् इति कौटिल्यः सम्यक् विवृणोति । राजविषये कौटिल्यः एवं वदाति
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ।
तस्मान्नित्योत्थितो राजा कुर्यादर्थानुशासनम् ।
अर्थस्य मुलमुत्थानमनर्थस्य विपर्ययः ।

प्रजासुखमेव राजसुखम् । तस्मात् जागरुकः राजा राज्यभारं कुर्यात् । तदेव प्रजाशासनम् । तच्च देशभिवृद्धये अनर्थनाशाय च मूलं कारणम् ।

REFERENCES

1. वाचस्पति गैरोला, कौटिलीय अर्थशास्त्रम् ,चौखम्बा विद्याभवन् वारणासी,2011. | 2. R Shamasastry , Kautilya's Arthashastra; The Way of Financial Management and Economic Governance, Bottom of the Hill Publishing, 2010.